वर्षम् - ०१ अङ्कः - ०१ शोधज्योतिः
जनवरी-दिसम्बर, २०१९ ISSN-2350-0700

# अभिज्ञानशाकुन्तलमङ्लविमर्शः तत्र शिवतत्त्वञ्च

**डॉ. ललितः पटेलः***

कालिदासग्रन्थानामावलोकनेन ज्ञायते यत् कानिचिद् वस्तूनि तस्य प्रियाणि सन्ति। पर्वतेषु हिमालयः नगरीषु उज्जयिनी, छन्दःसु मन्दाक्रान्ता, रसेषु श्रृङ्गारः, अलङ्कारेषु उपमा, ऋतुषु वसन्तः, तथैव देवेषु महादेवः शिवः तस्य परमः प्रियः। रघुवंशमहाकाव्ये अभिज्ञानशाकुन्तले च तेन शिवस्तुत्यैव मङ्गलाचरणं कृतम्। रघुवंशमहाकाव्यस्य मङ्गलाचरणम् -

**वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।**
**जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥** इति।

अभिज्ञानशाकुन्तलस्य मङ्गलाचरणम् -

**या सृष्टिः स्त्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री**
**ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।**
**यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः**
**प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः॥** इति।

कविकुलगुरुः कालिदासः अभिनेयार्थं दृश्यकाव्यविशेषं व्याचिकीर्षुः समाप्तिकामो मङ्गलमाचरेदित्यनुमितशिष्टाचारानुसारं निर्विघ्नपरिसमाप्तये स्वेष्टदेवतास्मरणात्मकं “**या सृष्टि ....०**” इति मङ्गलमाचरति। नीलकण्ठीयव्याख्यानुसारं - **“इह खलु सकलकविसार्वभौमः श्रीकालिदासः चिकीर्षितस्य प्रबन्धस्याविघ्नेन परिसमाप्त्यर्थं विशिष्टदेवतास्मरणद्वारेणाशिषं प्रयुङ्क्ते या सृष्टिरित्यादि”।** **‘आशीर्नमस्क्रियारूपः श्लोकः काव्यार्थसूचकः। नान्दीति कथ्यते”**[१] इति। भरतादिभिर्व्याकृताम् अवान्तरवाक्यात्मकाष्टपदभूषितां सर्वानन्दिनीं[२] पूर्वारङ्गाङ्गभूतां नान्दीं नाटकादौ पठति स्थापकनामा

---

* सहाचार्यः, अनुस्नातकविभागः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

[१] नाट्यशास्त्रम्, भरतमुनिः

[२] नीलकण्ठीय – व्याख्या अभिज्ञानशाकुन्तलस्य

सूत्रधारः - या सृष्टिरिति। या स्रष्टुः आद्या सृष्टिः, या विधिहुतं हविः वहति, या च होत्री, ये द्वे कालं विधत्तः, या श्रुतिविषयगुणा विश्वं व्याप्य स्थिता, या सर्वबीजप्रकृतिः इति आहुः, यया प्राणिनः प्राणवन्तः, ताभिः प्रत्यक्षाभिः अष्टाभिः तनुभिः प्रपन्नः वः अवतु इत्यन्वयः।

स्रष्टुः ब्रह्मणः, आदौ भव आद्या, सृज्यते इति सृष्टिः, ब्रह्मणः प्राथमिकी सृष्टि आपः जलम् इत्यर्थः। उक्तं च - "**अप एव ससर्जादौ तासु वीर्यमवासृजत्।** [३]'सः परमात्मा (शिवः) नानाविधाः प्रजाः आप एव ससर्ज। अत्र गुणद्वारा गुणिप्रत्ययने गुणीनां व्यङ्ग्यत्वेन व्यङ्ग्यप्रधानस्योत्तमकाव्यता भवति।[४]

या विधिहुतं हविर्वहति - इत्यत्र विधिः प्रेरणा तद्वाचकलिङादिविशिष्टविद्ध्युद्देश्यवाक्यम्। अवयवावयविसम्बन्धलक्षितलक्षणया विधिः। श्रुतिस्मृत्युक्तं तेन विधिना हुतं = दत्तं, क्षिप्तं हविः = पुरोडाशादिकं हवनीयद्रव्यजातं, वहति = प्रापयति, आदत्ते। या तनुः श्रुतिस्मृत्युक्तविधानेन अग्नौ समर्पितं घृतादिकं होमद्रव्यं देवान् प्रापयति सा वह्निमयीमूर्तिः[५] इत्यर्थः। अनेन हविः अधिकरणभूता संस्कृतास्त्रेताग्नय उच्यन्ते। अत्र वहतिनाधाराधेयसम्बधेनादानं लक्ष्यते। फलपर्यन्तताप्रापणं च व्यज्यते। अविधिहुतं भस्मीभवति अत एव विधिहुतमिति कथितम्। अन्यथा हवनीयस्य एतदव्यभिचारादर्थपौनरुक्त्यं स्यात्। अत्रापि अतिशयो ध्वन्यते। अग्निस्त्वयं हविषोऽधिकरणं भूत्वा इन्द्रादिदेवताः आत्मानं च यजमानादिहुतं प्रापयति। तस्मात् अग्निस्वरूपः शिवः।

**'या च होत्री"** इत्यत्र च-शब्दः समुच्चयार्थः । हविः = अधिकरणं वहनकर्ता च। अनेन विचित्रशक्तित्वं द्योत्यते। होत्री अर्थात् यजमानरूपा। व्युत्पत्त्या जुहोति इति होत्री। उक्तं च - "**दीक्षितं ब्राह्मणं प्राहुरात्मानं च मुनीश्वराः। यजमानाह्वया मूर्तिर्विश्वस्य शिवदायिनः**[६]" इति। यद्यपि होतृशब्दः ऋत्विक्षु प्रयुज्यते तथापि हवनस्य देवतोद्देशेन द्रव्यत्यागात्मकत्वात् तस्य यजमानत्वेन यजमान एव मुख्यो होता। **शिवस्य यजमानरूपा मूर्तिरियम्** इत्यर्थः।

**"ये द्वे कालं विधत्तः"** इत्यत्र द्विसंख्यके तनू सूर्यचन्द्रमस्वरूपे। चन्द्रात्मकं सूर्यात्मकं चेति तनुद्वयमित्यर्थः। यद्यपि कालः तु नित्यो विभुः तथापि व्यवहारेषु सूर्यगतिपरिच्छिन्नस्यैव कालशब्दवाच्यत्वात् सूर्यगतिपरिछिन्नः कालः मुहूर्ताहोरात्रादिः चन्द्रगत्युपलक्षिताः प्रतिपाद्याः

---

[३] "सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः" – मनुस्मृतिः १.१८

[४] "इदमुत्तमतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः"।- काव्यप्रकाशः - १.४

[५] अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥ - मनुस्मृतिः – ३,७६

[६] लिङ्गपुराणम् – उत्तरभागः = १२/४४

स्थितयः, तादृक् परिच्छिन्नकर्तृत्वेन तयोः कालविधायित्वम्। तौ सूर्यचन्द्रौ रात्रिन्दिवं कुरुतः इत्यर्थः। एवं **भगवतः शिवस्य चन्द्रात्मकं सूर्यात्मकं तनुद्वयम्।**

**"या श्रुतिविषयगुणाः विश्वं व्याप्य स्थिता"** इत्यत्र श्रूयते अनया इति श्रुतिः, श्रुतेः श्रवणेन्द्रियस्य विषयः" इति श्रुतिविषयः, (शब्दः) सः गुणो यस्याः सा श्रुतिविषयगुणा अर्थात् श्रवणेन्द्रियग्राह्यशब्दाख्यविशेषगुणशालिनी। शब्दगुणो यस्याः सा तथोक्ता मूर्तिः। विश्वं = चराचरं, अन्तर्बहिः व्याप्य स्थिता वर्तते। न कयाचिदपि विरहिता। अनेन आकाशम् उच्यते। तस्याकाशस्य शब्दगुणत्वात् विभुत्वाच्च। यदाहुः **"शब्दगुणकमाकाशमिति", "व्योमविभुर्नित्यमिति"** च। आकाशाख्या भगवतो मूर्तिरित्यर्थः।[७]

**"यां सर्वबीजप्रकृतिरित्याहुः"** इत्यत्र सर्वेषां बीजानां प्रकृतिः प्रधानकारणमिति। सर्वविधस्याद्यङ्कुरकारणभूता **पृथ्वीरूपा भगवतो मूर्तिरित्यर्थः।** तत्कदाचित् उपादानं कदाचित् च निमित्तकारणमिति। पृथिवी पार्थिवानां साक्षादुपादानं कारणम्। आप्यानां तैजसानां वायव्यानां चोपष्टम्भकत्वेन उपादानमाहुः शास्त्रतत्त्वविदः इति। उक्तं च - **"इयं हि भूमिर्भूतानां शाश्वती योनिरुच्यते"**[८] इति।

**"यया प्राणिनः प्राणवन्तः"** इत्यत्र यया = वायुरूपया तन्वा शरीरिणः चैतन्यभाजो भवन्ति इत्यर्थः। अनेन वायुरुच्यते। तस्यैव प्राणापानादिव्यापारेण शरीरधारकत्वात्। अत्र रूढ्या सामान्यमुद्दिश्य प्राणवन्त इति वैशिष्ट्यस्य विधानम्। अन्यथा पर्यायोच्चारणेन पौनरुक्त्यं स्यात्। एतेन प्राणवायुः जीवात्मानः आश्रयः तद्वन्तः प्राणवन्तः इत्यर्थः। एतेन सर्वातिशयो व्यज्यते। **वायुरूपा भगवतः शिवस्य मूर्तिरित्यर्थः।**

एताभिः पूर्वोक्ताभिः स्थूलबुद्धिभिरपि प्रत्याक्षाभिः अष्टसंख्याभिः जल-वह्नि-यजमान-चन्द्र-सूर्य-आकाश-पृथिवी-वायुरूपाभिः मूर्तिभिः युक्तः चराचरनियन्ता शक्तिविशिष्टो भगवान् शिवः युष्मानः अस्मान् रक्षतु इत्यर्थः। विश्वस्मिन् अष्टमूर्तयः समेषां प्रत्यक्षीभवन्ति। उक्तं च –

**भूमिरापोऽनलो वायुरात्मा व्योम रविश्शशी।**
**इत्यष्टौ सर्वलोकानां प्रत्यक्षा हरमूर्तयः ॥**[९]

---

[७] आकाशस्य च विज्ञेयः शब्दो वैशेषिको गुणः। - बृहद्धातुरत्नाकरः – ४४
**'क्षोत्रेन्द्रियग्राह्यो गुणः शब्दः'** इति अन्नंभट्टस्तर्कसंग्रहे।

[८] प्रसिद्धं पद्यम्।

[९] प्रसिद्धं पद्यम्।

उभयोः जलवाय्वोः त्वगिन्द्रियेण स्पर्शप्रत्यक्षं भवति। यजमान-चन्द्र-सूर्य-पृथिवीनां चक्षुरिन्द्रियेण चाक्षुषं प्रत्यक्षं भवति, शब्दस्य श्रोत्रेन्द्रियेण श्रावणम्, आकाशस्य चौपचारिकं चाक्षुषं प्रत्यक्षं सर्वैरेव सदाऽनुभूयते। एवं परमात्मनः शिवस्य स्वयंप्रकाशत्वेन मानसप्रत्यक्षत्वेन वा अष्टौ मूर्तयः प्रत्यक्षा इति निर्दिष्टाः। ईदृशैः ऐश्वर्यार्थकत्वात् कर्तुमकर्तुमन्यथाकर्तुं साम्यर्थ्यमैश्वर्यं निरुपपदेन सर्वेश्वरता द्योत्यते। एतादृशः अष्टमूर्तिः सर्वप्रसिद्धः भगवान् सदाशिवः सर्वेभ्यो भद्रं कुर्यात् इति भावः। अवतु = रक्षतु इत्यत्र रक्षणं नाम हितप्रापणमहितनिवारणं च। सुखसम्पादनं तथा अनिष्टनिवारणं व्यज्यतेऽत्र। तेन तादृशवस्तुनो व्यङ्ग्यत्वेन वस्तुध्वनिः, विदूषकाभिप्रायत्वेन परिकराङ्कारस्य तदलङ्कारध्वनिः।

अष्टमूर्तित्व-लक्षणा-साधारणद्रव्यस्वरूपप्रतिपादने स्वभावोक्तिलङ्कारो वा। तनुशब्दस्य अष्टाभिरपि वाक्यैः सम्बद्धत्वेन कारकदीपकालङ्कारश्च। सृष्टिः स्त्रष्टुः, प्राणिप्राण इत्यत्र अनुप्रासः। या हविर्या च होत्रीति विरोधाभासः प्रत्यक्षाभिः ताभिः तनुभिः प्रपन्नः इति समासोक्तिः। कवेः शिवविषयकभक्तिभावस्य व्यङ्ग्यत्वेन ससंलक्ष्यक्रमो भावध्वनिः।

अत्र कवेर्भक्तिभावस्य “शिवः” आलम्बनविभावः, संसारानित्यतादर्शनपरमेश्वरमहिमश्रवणातिकारुणिकत्वसकलपुमर्थदानशक्तित्वादयः उद्दीपनविभावः। अनुभावस्तु तदनुस्मरणसमनन्तरजनितरोमोद्गमनानदबाष्पमुखविकासादयः। सञ्चारिणोऽपि तद्विषयदैन्यवचनचिन्तास्मरणविबोधहर्षादयः। एवंविधविभावानुभावव्यभिचारिभिः परिपुष्टं भावं प्राधान्येन व्यञ्जता इत्यस्योत्तमकाव्यत्वम्। अत्र सर्वरीतीनां मुख्या रीतिः वैदर्भी। गुणेषु प्रधानः प्रसादगुणः। स्त्रग्धराछन्दश्च विज्ञेयम्। नान्दीश्लोकत्वादस्य सर्वगुरुः क्षेमकरो भगणः। उक्तं भामहेन - **“क्षेमं सर्वगुरुर्दत्ते म-गणोभूमिदैवतः”** इति।[१०] एवम् आद्याक्षराणां त्रयाणामत्र गुरुत्वात् मगणः। सृष्टेः प्रथममुपादानेन चास्य श्लोकस्य मङ्गलदायिता प्रकाश्यते। अनेनैव पूर्वरङ्गाङ्गमुक्तं भवति।

अनेन पद्येनाभिज्ञानशाकुन्तलस्य प्रतिपाद्यो विषयोऽपि सूच्यते। ब्रह्मणः श्रेष्ठा सृष्टिः = कृतिः शकुन्तलेति सूच्यते सौन्दर्यातिशयशालित्वात्। या च विधिहुतं = गर्भाधानविधानेन हुतं = निषिक्तमिति बीजं दुष्यन्तेनाहितं = वीर्यं वहति। एतेन शकुन्तलायाः गर्भावस्था सूच्यते । या च होत्री इत्यनेन कण्वो मुनिः उच्यते। ये द्वे सख्यौ अनसूयाप्रियंवदे। कालेन महर्षेः दुर्वाससः शापावसानसमयः सूच्यते। श्रुतिविषयगुणायाः अर्थात् शुभावहो विधिः यस्याः सा यद्वा विषयो देशः। एतेन दुष्यन्तराष्ट्रगमनं तत्तिरोधानं च सूचितम्। यामाहुः सर्वबीजप्रकृतिः इत्यनेन सर्वदमनाख्यबीजस्य योनिरुत्पत्तिकारणमित्यर्थलाभात् सर्वदमनकुमारस्तदुत्पतिश्च सूच्यते। यया प्राणिनः प्रजाः प्राणवन्तः इत्यनेन शकुन्तला-दुष्यन्त-सर्वदमनानां पुनः स्वराज्ये प्रत्यागमनं सूचितम्। ईशः = राजा दुष्यन्तः इत्थम्

[१०] भामहः - काव्यालङ्कारः

अष्टाभिः विभूतिभिः युक्तः सन् स्वराज्यं पालयतु इति नाटकोक्तोऽर्थः सूच्यते। एवं शब्दार्थशक्त्या नायकगुणाः नायिकागुणाश्च योजनीयाः। अस्याः नान्द्याः प्रकृतोपयोगित्वं वर्ण्यते दुष्यन्तस्य भरतमुखवंशादित्वमाद्या सृष्टिः अनेन व्यज्यते। विधिहुतं हविरिति हविरिव हविरक्ष्याशुल्कषड्भागादि, तेन राजर्षित्वं द्योत्यते। होत्रीति यज्ञमहादानादि कर्तृत्वम्। कालं विधत्त इति राजरक्षित प्राणिधर्मनिबन्धनत्वादयः इष्ट्यादिसम्पन्नकालस्य राज्ञः कालकर्तृत्वं, श्रुतिविषयेति श्रुतिविषयं श्रुतिधर्मप्रतिपादकं शास्त्रं तद्विषयमहोत्साहादिगुणत्वेन शास्त्रीयराजत्वम्। अथवा श्रुतिः श्रवणं अनन्यभावो विषयः शब्दार्थः। तेन निखिलश्रोत्रेन्द्रियाणि तद्गुणैकविषयाणीति पुण्यश्लोकताऽभिव्यज्यते। विश्वं व्याप्य स्थितेति कीर्तिप्रतापयोरप्रतिहतत्वम्। सर्वभूतप्रकृतिः सर्वेषां तत्तन्मार्गस्थापकत्वेन सर्वकारणत्वम्। **"स पिता पितरस्तासां केवलं जन्महेतुः"** इत्युक्त्वात्। प्राणिनः प्राणवन्तः इति निखिलवाञ्छितपूरकत्वेन प्राणिमात्रजीवनदातृत्वम्। अष्टाभिस्तनुभिरिति दिक्पालशरीरैः प्रसन्नः। "**अष्टानां लोकपालानां वपुर्धत्ते नराधिपः**" इति वचनात्। एवं शब्दार्थशक्त्या नायकगुणाः योजनीयाः। तथा नायिकाविषयत्वेनापि किञ्चित् द्योत्यते। स्त्रष्टुः सृष्टिरिति विश्वामित्रापत्यता, तस्यापि सृष्टित्वात्। विधिहुतं हविर्वहति दुष्यन्ताहितगर्भधारणं तेन गान्धर्वविवाहस्य शास्त्रीयत्वं द्योत्यते। होत्रीति यज्ञपत्नीत्वं व्यज्यते। तेन सौशील्यादिकम्। एवं यथौचित्यं योज्यम्। कालिदासस्य चिन्तनं ज्ञानमपि गम्भीरं प्रतिभाति श्लोकेऽस्मिन्। **"या सृष्टिः स्त्रष्टुराद्या"** इत्यत्र वेदपुराणेतिहासादीनां ज्ञानम्। **"या विधिहुतं हवि.....०"** इत्यत्र यज्ञयागादिज्ञानमवलोक्यते। **"ये द्वे कालं विधत्तः"** इत्यत्र ज्यौतिषं द्योत्यते। **"श्रुतिविषयगुणाः....०"**इत्यनेन वैशेषिकदर्शनसांख्यादिज्ञानं सूचितं भवति। अनेन श्लोकेन दुष्यन्तशकुन्तलयोः नायकनायिकयोः गुणारोपात् नाट्यशास्त्रज्ञानं साहित्यशास्त्रज्ञानमपि व्यज्यते। एवं कालिदासविद्वत्तायाः प्रमाणरूपोऽयं श्लोकः।

## सन्दर्भग्रन्थाः

१. नाट्यशास्त्रम्, भरतमुनिः

२. काव्यप्रकाशः, श्रीमम्मटाचार्यविरचितः

३. मनुस्मृतिः

४. लिङ्गपुराणम्

५. बृहद्धातुरत्नाकरः

६. काव्यालङ्कारः